National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(60): 162-163
© 2025 NJHSR
www.sanskritarticle.com

**विश्वरञ्जनसाहुः**
शोधच्छात्रः, धर्मशास्त्रविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

**Correspondence:**
**विश्वरञ्जनसाहुः**
शोधच्छात्रः, धर्मशास्त्रविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

# बौधायनधर्मसूत्रे भौगलिकप्रथानामुल्लेखः

**विश्वरञ्जनसाहुः**

**शोधसारः**

संस्कृतसाहित्यवाङ्मये नैकग्रन्थेषु भौगलिकप्रथायाः परम्परायाश्चानुशीलनं विहितं वर्तते। अत्र धर्मशास्त्रे अपि मनुयाज्ञवल्क्यप्रभृतिग्रन्थेषु भारतवर्षस्यादरः सुतरां द्योतते। धर्मशास्त्रवाङ्मयस्याद्यस्रोतसि धर्मसूत्रेष्वपि प्राचीनभारतस्योल्लेखः प्राप्यते। अत्र भौगलिकत्वेन दाक्षिणात्यप्रदेशः उत्तरभारतवर्षमिति नैकप्रयोगो दृश्यते। आचारप्रसङ्गे भिन्नत्वं तत्र दक्षिणतः उत्तरतः सर्वथा प्राप्यते। अतः अस्य प्रसक्तिस्तु नैकशास्त्रेषु सुतरां भजते।

**पारिभाषिकशब्दाः –** भाल्लविशाखा, गङ्गा, सिन्धुः, नर्मदा, कलिङ्गप्रदेशः, उड्रः

**उत्तरं यत्समुद्रस्य हिमाद्रिश्चैव दक्षिणम्।**
**वर्षं तद् भारतं नाम भारती यत्र सन्ततिः॥**[1]

अत्र विष्णुपुराणे भारतस्य स्थाननिरूपणं विहितमेव। अत्रोक्ततथ्याधारेण उत्तरस्यां दिशि विशालसमुद्रं हिमाद्रिश्च हिमालयो दक्षिणस्यां दिशि यत् वर्तते तद्भागधेयं वर्षं भारतवर्षं भवति। अस्य अन्यत्रापि पुराणेषु स्कन्दादषु बहुधा चर्चा प्राप्यते।

संस्कृतवाङ्मये भारतवर्षस्य प्रसक्तिस्तु बहुधा श्रूयते। मनुस्मृतौ कथ्यते –

**एतद्देश प्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥**[2]

एतस्मात्प्रान्तविशेषात् पृथिव्यां सर्वे च मानवाः नैकतथ्यं शिक्षेरन्। यतः श्रुत्युक्तानि कर्माणि अत्र पदे पदे संस्कृतभाषायां सेवितानि भवन्ति। तदर्थमस्य प्रान्तस्य भारतवर्षमिति भरतस्य नामानुगुणं प्रवर्तते। अस्य प्रसक्तिः शास्त्रेषु नैकधा प्राप्यते। विष्णुपुराणे अस्य भारतस्य नैक नामानि अजनाभदेशः आर्य्यावर्त्तः भारतवर्षमिति बहुधा श्रूयते। अतः पुराणेषु महाभारते रामायणे भारतवर्षस्य प्रसिद्धिस्तु पदे पदे जनानां मनसि तद्गतानां संस्कृतीनां संस्काराणां च प्रसिद्धिमवाप्नोति। अतः अस्य भारतवर्षस्य नैकप्रंशसा धर्मशास्त्रे सुविहितमेव।

तदनु धर्मसूत्रादिष्वपि भारतस्य संस्कृतिपरम्परा अव्याहतरीत्या सर्वतोमुखविकासः जातो वर्तते। अतः धर्मसूत्रेषु प्रमुखतया गौतमबौधायनापस्तम्बप्रभृतिग्रन्थेषु अस्य वैशिष्ट्यं बहुधा समालोचितं वर्तते।

कस्यचित्प्रदेशविशेषस्य प्रान्तविशेषस्य लौकिकालौकिकत्वमुद्दिश्य सञ्चरितघटनानामुत्तोरत्तरमुल्लेख-पूर्वकधर्मसूत्राण्यादिमकालादेव प्रचलितानि सन्ति। धर्मसूत्रस्थप्रमुखप्रतिपाद्यमानविषयप्रस्तावेष्वागतानां दृष्टान्तानां विविधप्रथाः आलोच्यन्ते। तत्र प्रायशः भारतवर्षस्य विविधप्रान्तविशेषेषु घटितानां संस्कारसंस्कृतिपरम्परैतिह्यादीनाम् उत्तरोत्तरोल्लेखोऽत्र दृश्यते। गौतमधर्मसूत्रादारभ्य बौधायनापस्तम्बं यावत्प्रायशः सर्वैस्तावत् निर्दिष्टभौगलिकपरिसीमायुक्तानि तथ्यानि सदैव प्राप्यन्ते। भारतवर्षं विविधप्रान्तेषु विभक्तमस्ति। धार्मिकक्रियाकलापानामन्तर्निहिततथ्यान्यत्र परिभाषितानि सन्ति। प्रादेशिकघटनानां दैनन्दिनजीवनजीविकायां परिमार्जितो भूत्वा प्रतिष्ठिताः भवन्ति। अत्रोक्ताः विषयाः नैसर्गिकसाधनभूताः मार्मिकतथ्योचयाश्च मन्यन्ते।

धर्मशास्त्रसाहित्ये भारतवर्षस्य विविधप्रदेशानां विविधप्रान्तानामुल्लेखो दृश्यते। यथा –

उत्तरभारतवर्षम् – प्रतिष्ठितोत्तरमादायोत्तरभारतवर्षं प्रवर्तते।

दक्षिणभारतवर्षम् – गोदावरीप्रान्तकन्याकुमारीकां यावत्प्रदेशः

पूर्वभारतवर्षम् – सागरप्रान्तप्रदेशकलिङ्गवङ्गादिप्रदेशविशेषाः भवन्ति।

पश्चिमभारतवर्षम्– विन्ध्यपर्वतपाददेशादारभ्यासागरसीमान्तप्रदेशः पश्चिमाञ्चलमिति प्रथते।

अत्र बौधायनधर्मसूत्रे पश्चिमाञ्चलपूर्वाञ्चलोत्तराञ्चलदक्षिणाञ्चलत्वेन विविधविषयाः पृष्ठपोषकत्वं धारयन्ति। तत्र तावत् उच्यते –

**पञ्चधा विप्रतिपत्तिर्दक्षिणतस्तथोत्तरतः।**[3]

इत्यत्र दक्षिणप्रदेशोत्तरप्रदेशस्थविविधप्रादेशिकसंस्काराः प्रथाः परम्पराः अत्रोक्ताः सन्ति। तत्र उत्तरप्रान्तप्रदेशेभ्यो भिन्नप्रथापरम्पराः अत्र प्रवर्तन्त इति निर्धार्यते। व्याख्याकारगोविन्दस्वामिवर्येण भाष्यपङ्क्त्या स्पष्टपर्यालोचितं यत् –

**दक्षिणेन नर्मदामुत्तरेण कन्यातीर्थम्।**[4]

**उत्तरस्तु दक्षिणेन हिमवन्तमुदग्विन्ध्यस्य।**[5]

आचारसंहिताभेदेनोत्तरदक्षिणभागस्थप्रदेशेभ्यःपरिचर्च्यमानाःसर्वेऽपि विषयाः भिन्नाः केषुचित्स्थलविशेषेषु समानाः सन्ति।

भारतवर्षस्यार्यावर्त्तत्वेन आचारव्यवहारप्रायश्चित्तसमाचरितप्रदेशत्वेन शिष्टचारयुक्तः प्रदेशः इति बहुधा बौधायनेन परिभाषितं वर्तते। तत्र उच्यते हि –

**प्रागदर्शनात् प्रत्यक्कालकवनाद्दक्षिणेन हिमवन्तमुदक्पारियाग्रमेतदार्यावर्त्त तस्मिन् य आचारस्स प्रमाणम्।**[6]

अर्थात्सरस्वतीनद्याः विलुप्तस्थानात्पूर्वं प्रति कालकवननाम्ना प्रतिष्ठितवनात्पश्चिमं यावत् हिमालयपर्वताद्दक्षिणस्यां दिशि परियात्रपर्वतस्योत्तरभागस्य भूभागः क्षितितले आर्यावर्त्तेति नाम्ना प्रथत इति बौधायनस्याशयो घटते।

अन्यत्रापि गङ्गायमुनयोर्मध्यवर्त्तिप्रदेशभागे विद्यमानप्रदेशः एव विविधाचार्याणां मतानुसारमार्यावर्त्तेति उच्यते।

तदर्थं कथ्यते –

**गङ्गायमुनयोरन्तरमित्येके।**[7]

अन्यत्र भाल्लविशाखायां प्रोच्यते यत् –

**पश्चात् सिन्धुर्विसरणी सूर्यस्योदयनं पुरा।**
**यावत् कृष्णो विधावति तावद्धि ब्रह्मवर्चसमिति॥**[8]

पश्चिमप्रान्तविलुप्तमाननद्यः पूर्वप्रान्ते सूर्योदयस्थानपर्यन्तस्थानयोर्मध्ये यत्र कृष्णमृगाः प्राप्यन्ते तत्स्थानमार्यावर्त्तेति ब्रह्मतेजयुक्तब्रह्मवर्चसप्राप्तिनिमित्तं भवति।

बौधायनेन विविधप्रदेशानामुल्लेखयुक्तियुक्ततया प्रतिपादितं वर्तते। अत्रोक्तप्रदेशाः भारतीयधर्मदर्शनाचारव्यवहारप्रायश्चित्तमीमांसायामुच्चकोटिरस्थानत्वेन बिभाति।

**अवन्तयोऽङ्कमगधाः सुराष्ट्रदक्षिणापथः।**
**उपावृत्सिन्धुसौवीराः एते सङ्कीर्णयोनयः॥**[9]

अन्यच्चापि अत्र प्रतिपाद्यते यत् –

**प्रारट्टान् कारस्करान् पुण्ड्रान सौवीरान्,**
**वङ्गान् कलिङ्गान् प्रानूनानिति च गत्वा पुनस्तोमेन यजेत सर्वपृष्ठया वा।**[10]

कलिङ्गप्रदेशस्य माहात्म्यमत्र बहुधा प्रकीर्त्तितं वर्तते। अत्र कलिङ्गस्य प्रशंसायां बहुधा तस्य प्रशंसोक्तिर्व्यज्यते। यथा –

**पदभ्यां स कुरुते पापं यः कलिङ्गान् प्रपद्यते।**
**ऋषयो निष्कृतिं तस्य प्राहुर्वैश्वानरं हविः॥**[11]

भारतवर्षे उत्कलप्रदेशाख्य उड्रनाम्ना प्रसिद्धस्य स्थानस्य यथा पौराणिकाभिमतं शास्त्रसम्मतं प्राप्यते तद्वत् अत्रापि बहु प्राचीनानां सांस्कृतिकतथ्यानां समायोजनं प्राप्यते। अतः अस्य प्रान्तस्य वैशिष्ट्यमपि बहुधा शास्त्रेषु श्रूयते। कपिलपुराणादिषु ग्रन्थेषु उत्कलस्य महिमा बहुधा प्राप्यते। तत्रोक्ततीर्थानां प्रशस्तिः सुतरां तत्र तत्र प्रसङ्गप्राप्ते सति संलक्ष्यते।

**उपसंहारः**

इदं स्पष्टीकरणं भवति यत् भारतवर्षस्य प्राचीनता शास्त्रोक्तसिद्धान्ताधारेण प्रतिभाति। बौधायनधर्मसूत्रे भारतवर्षस्यैतादृशं वर्णनं सुतरामुत्तममार्गप्रशस्तये सांस्कृतिकप्रथानां समुन्नतये उत्तरदक्षिणप्रान्तप्रदेशे कुत्रचित् भिन्नता प्राप्यते परन्तु ततोऽपि ऐक्यस्य वार्त्ता सदैव विदधाति। अतः भारतवर्षं सर्वेषां प्रान्तानां गुरुरिति मनुनापि आम्नातं वर्तते। यतोहि सर्वे च मानवाः इतः प्रसूतानामग्रजन्मनां सकाशात् नैकशास्त्रपाण्डित्यमर्जयन्।

**<u>सहायकग्रन्थसूची</u>**


१. मनुस्मृतिः, मन्वर्थमुक्तावली सहिता, चौखम्बा संस्कृत सीरीज आफिस्, वाराणसी, १९७०

२. आपस्तम्बधर्मसूत्रम्, चौखम्बा संस्कृत सीरीज् आफिस् वाराणसी, १९६६

३. धर्मशास्त्रेतिहासः, प्रो.जयकृष्णमिश्रः, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, २०१०

४. बौधायनधर्मसूत्रम्, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी,

५. श्रीविष्णुपुराणम्, नाग पब्लिशर्स, दिल्ली, २००४


**संदर्भ:**

[1] वि. पु. २.३.१

[2] म. स्मृ. २.२०

[3] बौ.ध.सू. १.२.१२

[4] बौ.ध.सू. १.२.१२ गोविन्दस्वामी व्याख्या..

[5] बौ.ध.सू. १.२.१२ गोविन्दस्वामी व्याख्या..

[6] बौ.ध.सू. १.२.१०

[7] बौ.ध.सू. १.२.११

[8] बौ.ध.सू. १.२.१३

[9] बौ.ध.सू. १.२.१४

[10] बौ.ध.सू. १.२.१५

[11] बौ.ध.सू. १.२.१६